# श्री वैराग्य पञ्चकम्

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि ॥

क्षोणि कोण शतांश पालन कला दुर्वार गर्वानल-
क्षुभ्यत् क्षुद्र नरेन्द्र चाटु रचना धन्यान् न मन्यामहे ।
देवं सेवितुम् एव निश्चिनुमहे योऽसौ दयालुः पुरा
धाना मुष्टि मुचे कुचेल मुनये दत्ते स्म वित्तेशताम्

सिलं किमनलं भवे दनल मौदरं बाधुतुं
पयः प्रसृति पूरकं किमु न धारकं सारसम् ।
अयत्न मलमल्लकं पथि पटच्चरं कच्चरं
भजन्ति विबुधा मुधा ह्यहह कुक्षितः कुक्षितः ॥१

ज्वलतु जलधि क्रोड क्रीडत् कृपीड भवप्रभा-
प्रतिभट पटु ज्वाला मालाकुलो जठरानलः ।
तृणमपि वयं सायं संपुल्ल मल्लि मतल्लिका-
परिमळमुचा वाचा याचामहे न महीश्वरान् ॥२

दुरीश्वर द्वार बहिर् वितर्दिका-
दुरासिकायै रचितोऽयम् अञ्जलिः ।
यदञ्ज नाभं निरपायम् अस्ति मे
धनञ्जय स्यन्दन भूषणं धनम् ॥३

शरीर पतनावधि प्रभु निषेवणा पादनात्
अबिन्धन धनञ्जय प्रशमदं धनं दन्धनं ।
धनञ्जय विवर्धिनं धनमुदूढ गोवर्धनं
सुसाधनम् अबाधनं सुमनसां समाराधनम् ॥४

नास्ति पित्राऽऽर्जितं किञ्चिन्
न मया किञ्चिद् आर्जितम् ।



rmvenkat@yahoo.com

अस्ति मे हस्तिशैलाग्रे
वस्तु पैतामहम् धनम् ॥५

कवितार्किक सिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः